Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महाकाल शनि मृत्युञ्जय स्तोत्र

रणधीर प्रकाशन

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मार्तण्ड भैरव तन्त्रोक्तम्

महाकाल शनि मृत्युंजय स्तोत्रम्

(दशरथ कृत शनि स्तोत्र,
श्नैश्चरस्तवराजः, शनि स्तोत्रम्,
शनिवज्र पंजर कवचादि सहित)

मूल्य : १०.०० रुपये

रणधीर प्रकाशन, हरिद्वार

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रकाशक –
रणधीर प्रकाशन
रेलवे रोड, आरती होटल के पीछे
हरिद्वार (उ. प्र.)
फोन (0133) 426297

वितरक –
रणधीर बुक सेल्स,
रेलवे रोड, हरिद्वार (उ. प्र.)

मुख्य विक्रेता –

१. पुस्तक संसार, बड़ा बाजार, हरिद्वार
२ पुस्तक संसार, 167, नुमाइश मैदान, जम्मू तवी
३. गगनदीप पुस्तक भंडार, एस. एन. नगर, हरिद्वार

मुद्रकः
राजा ऑफसेट प्रिंटर्स
लक्ष्मी नगर, दिल्ली-92 फोनः 2207789

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

❋ श्री गणेशाय नमः ❋

मार्तण्डभैरवतन्त्रोक्तम्

महाकाल शनि मृत्युंजय स्तोत्रम्

श्री गणेशाय नमः।
ॐ शनैश्चराय नमः।

नीलाद्रिशोभाञ्चितदिव्य मूर्तिः खड्गी त्रिदण्डी शरचापहस्तः।
शम्भुर्महाकालशनिः पुरारिर्जयत्यशेषासुरनाशकारी।। १ ॥

मेरुपृष्ठे समासीनं सामरस्ये स्थितं शिवम्।
प्रणम्य शिरसा गौरी पृच्छतिस्म जगद्धितम्।। २ ॥

पार्वत्युवाच।

भगवन्! देवदेवेश! भक्तानुग्रहकारक!।
अल्पमृत्युविनाशाय यत्त्वया पूर्व सूचितम्।। ३ ॥

तदेव त्वं महाबाहो! लोकानां हितकारम्।
तव मूर्तिप्रभेदस्य महाकालस्य साम्प्रतम्।। ४।।

शनेर्मृत्युंजय स्तोत्रम् ब्रूहि मे नेत्र जन्मनः।
अकाल मृत्युहरणमपमृत्यु निवारणम्।। ५।।

शनिमन्त्रप्रभेदा ये तैर्युक्तं यत्स्तवं शुभम्।
प्रतिनाम चतुर्थ्यन्तं नमोऽन्तं मनुनायुतम्।। ६।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीईश्वर उवाच -

नित्ये प्रियतमे गौरि सर्वलोकहितेरते।
गुह्याद्गुह्यतमं दिव्यं सर्वलोकोपकारकम्।। ७।।

शनिमृत्युञ्जयस्तोत्रं प्रवक्ष्यामि तवाऽधुना।
सर्वमङ्गलमाङ्गल्यं सर्व शत्रु विमर्दनम्।। ८।।

सर्व रोगप्रशमनं सर्वापद्विनिवारणम्।
शरीरारोग्यकरणमायुर्वृद्धिकरं नृणाम्।। ९।।

यदि भक्तोसि मे गौरी गोपनीयं प्रयत्नतः।
गोपितं सर्वतन्त्रेषु तच्छृणुष्व महेश्वरी!।। १०।।

ॐ अस्य श्रीमहाकालशनि मृत्युञ्जयस्तोत्रमन्त्रस्य पिप्पलादऋषिरनुष्टुप्छन्दो महाकालशनिर्देवता शं बीजमायसी शक्तिःकालपुरुषायेति कीलकं ममाकालाप्रमृत्युनिवारणर्थे पाठे विनियोगः।

ऋषिन्यासं करन्यासं देहन्यासं समाचरेत्।
महोग्रं मूर्ध्नि विन्यस्य मुखे वैवस्वतं न्यसेत्।। ११।।

गले तु विन्यसेन्मन्दं बाह्वोर्महाग्रहं न्यसेत्।
हृदि न्यसेत्महाकालं गुह्ये कृशतनुं न्यसेत्।। १२।।

जान्वो स्तूडुचरं न्यस्य पादयोस्तु शनैश्चरम्।
एवं न्यासविधिं कृत्वा पश्चात् कालात्मनः शनेः।। १३।।

न्यासं ध्यानं प्रवक्ष्यामि तनौ ध्यात्वा पठेन्नरः।
कल्पादियुगभेदांश्च कराङ्गन्यासरुपिणः।। १४।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कालात्मनो न्यसेद् गात्रे मृत्युञ्जय! नमोऽस्तुते।
मन्वन्तराणि सर्वाणि महाकालस्वरूपिणः।। १५।।

भावयेत्प्रति प्रत्यङ्गे महाकालाय ते नमः।
भावयेत्प्रभवाद्यब्दान् शीर्षे कालजिते नमः।। १६।।

नमस्ते नित्यसेव्याय विन्यसेदयने भ्रुवोः।
सौरये च नमस्तेऽस्तु गण्डयोर्विन्यसेदूतून्।। १७।।

श्रावणं भावयेदक्ष्णोनर्मः कृष्णनिभाय च।
महोग्राय नमो भाद्रं तथा श्रवणयोर्न्यसेत्।। १८।।

नमो वै दुर्निरीक्ष्याय चाश्विनं विन्यसेन्मुखे।
नमो नीलमयूखाय ग्रीवायां कार्तिकं न्यसेत।। १९।।

मार्गशीर्ष न्यसेदबाहूवोर्महारौद्राय ते नमः।
ऊर्ध्वलोकनिवासाय पौषं तु हृदये न्यसेत्।। २०।।

नमः कालप्रबोधाय माघं वै चोदरे न्यसेत्।
मन्दगाय नमो मेढ्रे न्यसेद्वैफाल्गुनं तथा।। २१।।

ऊर्वोर्न्यसेच्चैत्रमासं नमः शिवोद्भवाय च।
वैशाखं विन्यसेज्जान्वोर्नमः संवर्त्तकाय च।। २२।।

जङ्घयोर्भावयेज्ज्येष्ठं भैरवाय नमस्तथा।
आषाढ़ पाद्योश्चैव शनये च नमस्तथा।। २३।।

कृष्णपक्षं च क्रूराय नमः आपादमस्तके।
न्यसेदाशीर्षपादान्ते शुक्लपक्षं ग्रहाय च।। २४।।

न्यसेन्मूलं पादयोश्च ग्रहाय शनये नमः।
नमः सर्वजिते चैव तोयं सर्वांगुलौ न्यसेत्।। २५।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्यसेत्गुल्फद्वये विश्वं नमः शुष्कतराय चः।
विष्णुभं भावयेज्जङ्घोर्भये शिष्टतमाय ते।।२६॥

जानुद्वये धनिष्ठां च न्यसेत् कृष्णरुचे नमः।
ऊरुद्वये वारुणर्क्षं न्यसेत्कालभृते नमः ।।२७॥

पूर्वभाद्रं न्यसेन्मेढ्रे जटाजूटधराय च।
पृष्ठ उत्तर भाद्रं च करालाय नमस्तथा।।२८॥

रेवतीं च न्यसेन्नाभौ नमो मन्दचराय च।
गर्भदेशे न्यसेद्वस्तं नमः श्यामतराय च॥ २९॥

नमो भोगिस्त्रजे नित्यं यमं स्तनयुगे न्यसेत्।
न्यसेत्कृत्तिकां हृदये नमस्तैलप्रियाय च॥ ३०॥

रोहिणीं भावयेद्धस्ते नमस्ते खड्ग धारिणे।
मृगं न्यसेद्वामस्ते त्रिदण्डोल्लसिताय च॥ ३१॥

दक्षोद्ध्र्वे भावयेद्रौद्रं नमो वै बाणधारिणे।
पुनर्वसुमूद्ध्र्ववामे नमो वै चापधारिणे॥ ३२॥

तिष्यं न्यसेद्दक्षबाहौ नमस्ते हर मन्यवे।
सार्पं न्यसेद्वामबाहौ चोग्रचापाय ते नमः॥ ३३॥

मघां विभावयेत्कण्ठे नमस्ते भस्मधारिणे।
मुखे न्यसेद्भगर्क्षं च नमः क्रूरग्रहाय च॥ ३४॥

भावयेद्दक्षनासायामर्यमाणश्च योगिने।
भावयेद्वामनासायां हस्तर्क्षं धारिणे नमः॥ ३५॥

त्वाष्ट्रं न्यसेद्दक्षकर्णे नमो ब्रह्ममयाय ते॥ ३६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विशाखां च दक्ष नेत्रे नमस्ते ज्ञानदृष्टये।
विष्कुम्भं भावयेच्छीर्षसन्धौ कालाय ते नमः॥ ३७॥

प्रीतियोगं भ्रुवोः सन्धौमहामन्द! नमोऽस्तुते।
नेत्रयोः सन्धावायुष्मोद्योगं भीष्माय ते नमः॥ ३८॥

सौभाग्यं भावयेन्नासासन्धौ फलाशनाय च।
शोभनं भावयेत्कर्णे सन्धौ पुण्यात्मने नमः॥ ३९॥

नमः कृष्णा यातिगण्डं हनुसन्धौ विभावयेत्।
नमो निर्मांसदेहाय सुकर्माणं शिरोधरे॥ ४०॥

धृतिं न्यसेद्दक्षबाहौ पृष्ठे छायासुताय च।
तन्मूलसन्धौ शूलं च न्यसेदुग्राय ते नमः॥ ४१॥

तत्कूर्परं न्यसेद्गण्डे नित्यानन्दाय ते नमः।
वृद्धिं तन्मणिबन्धे च कालज्ञाय नमो न्यसेत्॥ ४२॥

ध्रुवं तदङ्गुलीमूलसन्धौ कृष्णाय ते नमः।
व्याघातं भावयेद्वामबाहुपृष्ठे कृशाय च॥ ४३॥

हर्षणं तन्मूलसन्धौ भूतसन्तापिने नमः।
तत्कूर्परे न्यसेद्वज्रं सानन्दाय नमोऽस्तुते॥ ४४॥

सिद्धिं तन्मणिबन्धे च न्यसेत् कालाग्नये नमः।
व्यतीपातं कराग्रेषु न्यसेत्कालकृते नमः॥ ४५॥

वरीयांसं दक्षपार्श्वसन्धौ कालात्मने नमः।
परिघं भावयेद्वामपार्श्वसन्धौ नमोऽस्तुते॥ ४६॥

न्यसेद्दक्षोरुसन्धौ च शिवं वै कालसाक्षिणे।
तज्जानौ भावयेत्सिसिद्धिं महादेवाय ते नमः॥ ४७॥

वा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

साध्यं न्यसेच्च तद्गुल्फसन्धौ घोराय ते नमः।
न्यसेत्तदङ्गुलीसन्धौ शुभं रौद्राय ते नमः॥ ४८॥

न्यसेद्वामोरुसन्धौ च शुक्लकालविदे नमः।
ब्रह्मयोगं च तज्जानौ न्यसेत्तद्योगिने नमः॥ ४९॥

ऐन्द्रं तद्गुल्फसन्धौ च योगाऽधीशाय ते नमः।
न्यसेत्तदङ्गुलीसन्धौ नमो भव्याय वैधृतिम्॥ ५०॥

चर्मणि वै बवकरणं च भावयेद्यज्वने नमः।
बालवं भावयेद्रक्ते संहारक! नमोऽस्तुते॥ ५१॥

कौलवं भावयेदस्थिन् नमस्ते सर्वभक्षिणे।
तैतिलं भावयेन्मांसे आममांसप्रियाय ते॥ ५२॥

गरं न्यसेद्वपायां च सर्वग्रासाय ते नमः।
न्यसेद्वणिजं मज्जायां सर्वान्तक! नमोऽस्तुते॥ ५३॥

वीतिर्येभावयेद्विष्टिं नमो मन्यूग्रतेजसे।
रुद्रमित्र! पितृवसुवारीण्येतांश्च पञ्च च॥ ५४॥

मुहूर्तांश्च दक्षपादनखेषु भावयेन्नमः।
खगेशाय च खस्थाय खेचराय स्वरूपिणे॥ ५५॥

पुरुहूतशतमखे विश्ववैधो विधूंस्तथा।
मुहूर्त्तांश्च वामपादनखेषु भावयेन्नमः॥ ५६॥

सत्यव्रताय सत्याय नित्यसत्याय ते नमः।
सिद्धेश्वर! नमस्तुभ्यं योगेश्वर! नमोऽस्तुते॥ ५७॥

वह्निनक्तं चरांश्चैव वरुणार्यमयोनिकान्।
मुहूर्तांश्च दक्षहस्तनखेषु भावयेन्नमः॥ ५८॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लग्नोदयाय दीर्घाय मार्गिणे दक्षदृष्टये।
वक्राय चातिक्रूराय नमस्ते वामदृष्टये॥ ५९॥

वामहस्तनखेष्वन्त्यवर्णेशाय नमोऽस्तुते।
गिरिशाहिर्बुध्न्यपूषा जपाद्दस्त्रांश्च भावयेत्॥ ६०॥

राशिभोक्त्रे राशिगाय राशिभ्रमणकारिणे।
राशिनाथाय राशिनां फलदात्रे नमोऽस्तुते॥ ६१॥

यमाग्निचन्द्रादितिकविधर्तृंश्च विभावयेत्।
ऊर्ध्वहस्तदक्षनखेष्वन्त्यकालाय ते नमः॥ ६२॥

तुलोच्चस्थाय सौम्याय नक्रकुम्भगृहाय च।
समीरत्वष्टृ जीवांश्च विष्णुतिग्म द्युतीन्न्यसेत्॥ ६३॥

ऊर्ध्ववामहस्तनखेष्वन्यग्रहनिवारिणे।
तुष्टाय च वरिष्ठाय नमो राहु सखाय च॥ ६४॥

रविवारं ललाटे च न्यसेद्भ्रीमदृशे नमः।
सोमवारं न्यसेदास्ये नमो मृतप्रियाय च।॥ ६५॥

भौमवारं न्यसेत्स्वान्ते नमो ब्रह्मस्वरूपिणे।
मेढ्रे न्यसेत्सौम्यवारं नमो जीवस्वरूपिणे॥ ६६॥

वृषणे गुरुवारं च नमो मन्त्रस्वरूपिणे।
भृगुवारं मलद्वारे नमः प्रलयकारिणे॥ ६७॥

पादयोः शनिवारं च निर्मांसाय नमोस्तुते।
घटिकां न्यसेत्केशेषु नमस्ते सूक्ष्मरुपिणे॥ ६८॥

कालरूपिन्नमस्तेऽस्तु सर्वपापप्रणाशक!।
त्रिपुरस्य वधार्थाय शम्भुजाताय ते नमः॥ ६९॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमः कालशरीराय कालनुन्नाय ते नमः।
कालहेतो! नमस्तुभ्यं कालनन्दाय वै नमः॥ ७०॥

अखण्डदण्डमानाय त्वनाद्यंताय वै नमः।
कालदेवाय कालाय कालकालाय ते नमः॥ ७१॥

निमेषादिमहाकल्पकालरूपं च भैरवम्।
मृत्युञ्जयं महाकालं नमस्यामि शनैश्चरम्॥ ७२॥

दातारं सर्वभव्यानां भक्तानामभयङ्करम्।
मृत्युञ्जयं महाकालं नमस्यामि शनैश्चरम्॥ ७३॥

कर्त्तारं सर्वदुःखानां दुष्टानां भयवर्धनम्।
मृत्युञ्जयं महाकालं नमस्यामि शनैश्चरम्॥ ७४॥

हर्त्तारं ग्रहजातानां फलानामघकारिणाम्।
मृत्युञ्जयं महाकालं नमस्यामि शनैश्चरम्॥ ७५॥

सर्वेषामेव भूतानां सुखदं शान्तिमव्ययम्।
मृत्युञ्जयं महाकालं नमस्यामि शनैश्चरम्॥ ७६॥

कारणं सुखदुःखानां भावाऽभावस्वरूपिणम्।
मृत्युञ्जयं महाकालं नमंस्यामि शनैश्चरम्॥ ७७॥

अकालमृत्युहरणमपमृत्युनिवारणम्।
मृत्युञ्जयं महाकालं नमस्यामि शनैश्चरम्॥ ७८॥

कालरूपेण संसारं भक्षयन्तं महाग्रहम्।
मृत्युञ्जयं महाकालं नमस्यामि शनैश्चरम्॥ ७९॥

दुर्निरीक्ष्यं स्थूलरोमं भीषणं दीर्घलोचनम्।
मृत्युञ्जयं महाकालं नमस्यामि शनैश्चरम्॥ ८०॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्रहाणां ग्रहभूतं च सर्वग्रहनिवारणम्।
मृत्युञ्जयं महाकालं नमस्यामि शनैश्चरम्॥ ८१॥

कालस्य वशगाः सर्वे न कालः कस्यचिद्वशः।
तस्मात्त्वां कालपुरुषं प्रणतोऽस्मि शनैश्चरम्॥ ८२॥

कालदेव जगत्सर्वं काल एव विलीयते।
कालरूपः स्वयं शम्भुः कालात्मा ग्रहदेवता॥ ८३॥

चण्डीशो रुद्रडाकिन्याक्रान्तश्चण्डीश उच्यते।
विद्युदाकलितो नद्यां समारूढो रसाधिपः॥ ८४॥

चण्डीशः शुकसंयुक्तो जिह्वया ललितः पुनः।
क्षतजस्तामसी शोभी स्थिरात्मा विद्युता युतः॥ ८५॥

नमोऽन्तो मनुरित्येष शनितुष्टिकरः शिवे।
आद्यन्तेऽष्टोत्तरशतं मनुमेनं जपेन्नरः॥ ८६॥

यः पठेच्छृणुयाद्वाऽपि ध्यात्वा सम्पूज्य भक्तितः।
तस्य मृत्योर्भयं नैव शतवर्षावधिप्रिये!॥ ८७॥

ज्वराः सर्वे विनश्यन्ति दद्रु-विस्फोटकच्छुकाः।
दिवा सौरिं स्मरेत् रात्रौ महाकाल यजन् पठेत्॥ ८८॥

जन्मर्क्षे च यदा सौरिर्जपेदेतत्सहस्रकम्।
वैधगे वामवेधे वा जपेदर्द्धसहस्रकम्॥ ८९॥

द्वितीये द्वादशे मन्दे तनौ वा चाष्टमेऽपि वा।
तत्तद्राशौ भवेद्यावत् पठेत्तावद्दिनावधि॥ ९०॥

चतुर्थे दशमे वाऽपि सप्तमे नवपञ्चमे।
गोचरे जन्मलग्नेशे दशास्वन्तर्दशासु च॥ ९१॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गुरुलाघवज्ञानेन पठेदावृतिसंख्यया।
शतमेकं त्रयं वाऽथ शतयुग्मं कदाचन॥ ९२॥

आपदस्तस्य नश्यन्ति पापानि च जयं भवेत्।
महाकालालये पीठे ह्यथ्वा जल सन्निधौ॥ ९३॥

पुण्यक्षेत्रेऽश्वत्थमूले तैलकुम्भाग्रतो गृहे।
नियमेनैकभक्तेन ब्रह्मचर्येण मौनिना॥ ९४॥

श्रोत्तव्यं पठितव्यं च साधकानां सुखावहम्।
परं स्वस्त्ययनं पुण्यं स्तोत्रं मृत्युञ्जयाभिधम्॥ ९५॥

कालक्रमेण कथितं न्यासक्रम-समन्वितम्।
प्रातःकाले शुचिर्भूत्वा पूजायां च निशामुखे॥ ९६॥

पठतां नैव दुष्टेभ्यो व्याघ्रसर्पादितो भयम्।
नाग्नितो न जलाद्वायोर्देशे देशान्तरेऽथवा॥ ९७॥

नाऽकाले मरणं तेषां नाऽपमृत्युभयं भवेत्।
आयुर्वर्षशतं सायं भवन्ति चिरजीविनः॥ ९८॥

नाऽतः परतरं स्तोत्रं शनितुष्टिकरं महत्।
शान्तिकं शीघ्रफलदं स्तोत्रमेतन्मयोदितम्॥ ९९॥

तस्मात्सर्वप्रयत्नेन यदीच्छेदात्मनो हितम्।
कथनीयं महादेवि! नैवाभक्तस्य कस्यचित्॥ १००॥

॥ इति मार्त्तण्ड भैरव तन्त्रे
महाकाल शनि मृत्युंजय स्तोत्रम् सम्पूर्णम्॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ दशरथ कृत
शनि स्तोत्रम्

अथ विनियोगः–

ॐ अस्य श्रीशनिस्तोत्रमन्त्रस्य कश्यपऋषिस्त्रिष्टुपछन्दः, सौरिर्देवता, शं बीजम्, निःशक्तिः, कृष्णवर्णेति कीलकम्, धर्मार्थ-काम-मोक्षात्मक-चतुर्विध-पुरुषार्थसिद्धयर्थे जपे विनियोगः।

दाहिने हाथ में जल तथा थोड़े से साबुत चावल लेकर, 'ॐ अस्य श्रीशनिस्तोत्रमन्त्रस्य' से 'जपे विनियोगः' तक पढ़कर जल छोड़ दें। फिर न्यास करें।

अथ करन्यासः–

शनैश्चराय अंगुष्ठाभ्यां नमः
मन्दगतये तर्जनीभ्यां नमः
अधोक्षजाय मध्यमाभ्यां नमः
कृष्णांगाय अनामिकाभ्यां नमः
शुष्कोदराय कनिष्ठकाभ्यां नमः
छायात्मजाय करतल पृष्ठाभ्यां नमः

न्यास बोलते समय जिन-जिन अंगों का नाम आए उनको स्पर्श करते रहें।

अथ हृदयादि न्यासः–

शनैश्चराय हृदयाय नमः
मन्द गतये शिरसे स्वाहा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अधोक्षजाय शिखायै वषट्
कृष्णांगाय कवचाय हुम्
शुष्कोदराय नेत्रत्रयाय वौषट्
छायात्मजाय अस्त्राय फट्

'अस्त्राय फट्' कहकर बाईं हथेली पर सीधे हाथ से ताली बजाकर फट् की ध्वनि निकालो।

अथ दिगबन्धनम्–

ॐ भूर्भुवः स्वः
पढ़ते हुए चारों दिशाओं में चुटकी बजाएं।

अथ ध्यानम्–

नीलद्युति शूलधरं किरीटिनं गृध्रस्थितं त्रासकरं धनुर्धरम्।
चतुर्भुजं सूर्यसुतं प्रशान्तं वन्दे सदाभीष्टकरं वरेण्यम्॥

अर्थात्–नीलम के समान कान्तिमान, हाथों में धनुष और शूल धारण करने वाले, मुकुटधारी, गिद्ध पर विराजमान, शत्रुओं को भयभीत करने वाले, चार भुजाधारी, शान्त वर को देने वाले सदा भक्तों के हितकारक सूर्य-पुत्र को मैं प्रणाम करता हूँ।

अथ कथा

रघुवंशेषु विख्यातो राजा दशरथः पुरा।
चक्रवर्ती स विज्ञेयः सप्तद्वीपाधिपोऽभवत्॥ १॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृत्तिकान्ते शनिंज्ञात्वा दैवज्ञैर्ज्ञापितो हि सः।
रोहिणीं भेदयित्वातु शनिर्नास्यति साम्प्रतं॥ २॥
शकटं भेद्यमित्युक्तं सुराऽसुरभयङ्करम्।
द्वादशाब्दं तु दुर्भिक्षे भविष्यति सुदारुणम्॥ ३॥
एतच्छ्रुत्वा तु तद्वाक्यं मन्त्रिभिः सह पार्थिव।
व्याकुलं च जगद्दृष्टवा पौर-जानपदादिकम्॥ ४॥
ब्रुवन्ति सर्वलोकाश्च भयमेतत्समागतम्।
देशाश्च नगर ग्रामा भयभीताः समागताः॥ ५॥
पप्रच्छ प्रयतोराजा वसिष्ठ प्रमुखान् द्विजान्।
समाधानं किमत्राऽस्ति ब्रूहि में द्विजसत्तम॥ ६॥

प्राचीन काल में रघुवंश में दशरथ नामक प्रसिद्ध चक्रवर्ती राजा हुए जो सातों द्वीपों के स्वामी थे। उनके राज्यकाल में एक दिन ज्योतिषियों ने शनि को कृतिका के अन्तिम चरण में देखकर राजा से कहा कि यह शनि रोहिणी का भेदन कर जाएगा। इसको रोहिणी शकट भेदन कहते हैं। यह योग देवता और असुर दोनों ही के लिए भयप्रद होता है तथा इसके पश्चात् बारह वर्ष का घोर दुःखदायी अकाल पड़ता है। ज्योतिषियों की यह बात मन्त्रियों के साथ राजा ने सुनी, इसके साथ ही नगर और जनपद वासियों को बहुत व्याकुल देखा। उस समय नगर और ग्रामों के निवासी भयभीत होकर राजा से इस विपत्ति से रक्षा की प्रार्थना करने लगे। अपने प्रजाजनों की व्याकुलता को देखकर राजा दशरथ वशिष्ठ ऋषि तथा प्रमुख ब्राह्मणों से कहने लगे–"हे ब्राह्मणों इस समस्या का कोई समाधान मुझे बताइए!"॥ १–६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्राजापत्ये तु नक्षत्रे तस्मिन् भिन्नेकुतः प्रजाः।
अयं योगोह्यसाध्यश्च ब्रह्म-शक्रादिभिः सुरैः॥ ७॥

इस पर वशिष्ठ जी कहने लगे–प्रजापति के इस नक्षत्र (रोहिणी) में यदि शनि शकट भेदन होता है तो प्रजाजन सुखी कैसे रह सकते हैं। इस योग के दुष्प्रभाव से तो ब्रह्मा एवं इन्द्रादिक देवता भी रक्षा करने में असमर्थ हैं॥ ७॥

तदा सञ्चिन्त्य मनसा साहसं परमं ययौ।
समाधाय धनुर्दिव्यं दिव्यायुधसमन्वितम्॥ ८॥
रथमारुह्य वेगेन गतो नक्षत्रमण्डलम्।
त्रिलक्षयोजनंस्थानं चन्द्रस्योपरिसंस्थितम्॥ ९॥
रोहिणीपृष्ठमासाद्य स्थितो राजा महाबलः।
रथेतुकाञ्चने दिव्ये मणिरत्नविभूषिते॥ १०॥
हंसवर्णहयैर्युक्ते महाकेतु समुच्छ्रिते।
दीप्यमानो महारत्नैः किरीटमुकुटोज्वलैः॥ ११॥
व्यराजत तदाकाशे द्वितीय इव भास्करः।
आकर्णचापमाकृष्य सहस्रं नियोजितम्॥ १२॥
कृत्तिकान्तं शनिर्ज्ञात्वा प्रविशतांच रोहिणीम्।
दृष्टवा दशरथंचाग्रेतस्थौतु भृकुटीमुखः॥ १३॥
संहारास्त्रं शनिर्दृष्टवा सुराऽसुरनिषूदनम्।
प्रहस्य चभयात् सौरिरिदं वचनमब्रवीत्॥ १४॥

विद्वानों के यह वचन सुनकर राजा को ऐसा प्रतीत हुआ कि यदि वे इस संकट की घड़ी को न टाल सके तो उन्हें कायर कहा जाएगा। अतः राजा विचार करके साहस बटोरकर दिव्य धनुष तथा दिव्य आयुधों से युक्त होकर रथ को तीव्र

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation, Delhi and eGangotri.

गति से चलाते हुए चन्द्रमा से भी तीन लाख योजन ऊपर नक्षत्र मण्डल में ले गए। मणियों तथा रत्नों से सुशोभित स्वर्ण निर्मित रथ में बैठे हुए महाबली राजा ने रोहिणी के पीछे आकर रथ को रोक दिया। सफेद घोड़ों से युक्त और ऊंची-ऊंची ध्वजाओं से सुशोभित मुकुट में जड़े हुए बहुमूल्य रत्नों से प्रकाशमान राजा दशरथ उस समय आकाश में दूसरे सूर्य की भांति चमक रहे थे। शनि को कृत्तिका नक्षत्र के पश्चात् रोहिणी नक्षत्र में प्रवेश करने का इच्छुक देखकर राजा दशरथ बाण युक्त धनुष कानों तक खींचकर भृकुटियां तानकर शनि के सामने डटकर खड़ा हो गया। अपने आगे देव असुरों के संहारक अस्त्रों से युक्त दशरथ को खड़ा देखकर शनि थोड़ा डर गया और हंसते हुए राजा से कहने लगा॥ ८-१४॥

शनि उवाच–

पौरुषं तव राजेन्द्र! मया दृष्टं न कस्यचित्।
देवासुरमनुष्याश्च सिद्ध-विद्याधरोरगाः॥ १५॥
मयाविलोकिताः सर्वेभयं गच्छन्ति तत्क्षणात्।
तुष्टोऽहं तव राजेन्द्र! तपसापौरुषेण च॥ १६॥
वरं ब्रूहि प्रदास्यामि स्वेच्छया रघुनन्दनः!

शनि कहने लगा–हे राजेन्द्र! तुम्हारे जैसा पुरुषार्थ मैंने किसी में नहीं देखा क्योंकि देवता, असुर, मनुष्य, सिद्ध, विद्याधर और सर्प जाति के जीव मेरे देखने मात्र से ही भयभीत हो जाते हैं। हे राजेन्द्र! मैं तुम्हारी तपस्या और पुरुषार्थ से अत्यन्त प्रसन्न हूँ। अतः हे रघुनन्दन! जो तुम्हारी इच्छा हो वर मांग लो, मैं तुम्हें दूंगा॥ १५-१६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दशरथ उवाच–

प्रसन्नोयदि मे सौरे! एकश्चास्तु वरः परः॥ १७॥
रोहिणीं भेदयित्वा तु न गन्तव्यं कदाचन।
सरितः सागरा यावद्यावच्चन्द्रार्कमेदिनी॥ १८॥
याचितं तु महासौरे! नान्यमिच्छाम्यहं वरम्।
एवमस्तुशनिप्रोक्तं वरंलब्ध्वा तु शाश्वतम्॥ १९॥
प्राप्यैवं तु वरं राजा कृतकृत्योऽभवत्तदा।
पुनरेवाऽब्रवीत्तुष्टो वरं वरम् सुव्रत!॥ २०॥

हे सूर्य पुत्र शनि देव! यदि आप मुझ पर प्रसन्न हैं तो मैं केवल एक ही वर मांगता हूँ और वह यह कि जब तक नदियां, सागर, चन्द्रमा, सूर्य और पृथ्वी इस संसार में हैं तब तक आप रोहिणी शकट का भेदन कदापि न करें। मैं केवल यही वर मांगता हूँ और मेरी कोई इच्छा नहीं हैं। तब शनि ने 'एवमस्तु' कहकर वर दे दिया। इस प्रकार शनि से वर प्राप्त करके राजा अपने को धन्य समझने लगा। तब शनि ने कहा मैं तुमसे परम प्रसन्न हूँ, तुम और भी वर मांग लो॥ १७–२०॥

प्रार्थयामास हृष्टात्मा वरमन्यं शनिं तदा।
नभेत्तव्यं न भेत्तव्यं त्वया भास्करनन्दन॥ २१॥
द्वादशाब्दं तु दुर्भिक्षं न कर्तव्यं कदाचन।
कीर्तिरेषामदीया च त्रैलोक्ये तु भविष्यति॥ २२॥
एवं वरं तु सम्प्राप्य हृष्टरोमा स पार्थिवः।
रथोपरिधनुः स्थाप्यभूत्वा चैव कृताञ्जलिः॥ २३॥
ध्यात्वा सरस्वतीं देवीं गणनाथं विनायकम्।
राजा दशरथः स्तोत्रं सौरेरिदमथाऽकरोत्॥ २४॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तब राजा ने प्रसन्न होकर शनि से दूसरा वर मांगा। तब शनि कहने लगे–हे सूर्य वंशियों के पुत्र तुम निर्भय रहो, निर्भय रहो। बारह वर्ष तक तुम्हारे राज्य में अकाल नहीं पड़ेगा। तुम्हारी यश कीर्ति तीनों लोकों में फैलेगी। ऐसा वर पाकर राजा प्रसन्न होकर धनुष बाण रथ में रखकर हाथ जोड़कर सरस्वती देवी तथा गणपति का ध्यान करके शनि की स्तुति इस प्रकार करने लगा॥ २१-२४॥

दशरथ द्वारा शनि की स्तुति–

नमः कृष्णाय नीलाय शितिकण्ठनिभाय च।
नमः कालाग्निरुपाय कृतान्ताय च वै नमः॥ २५॥
नमो निर्मांसदेहाय दीर्घश्मश्रुजटाय च।
नमो विशालनेत्राय शुष्कोदरभयाकृते॥ २६॥
नमः पुष्कलगात्राय स्थूलरोम्णेऽथ वै नमः।
नमो दीर्घाय शुष्काय कालदंष्ट्र नमोऽस्तुते॥ २७॥
नमस्ते कोटिराक्षाय दुर्निरीक्ष्याय वै नमः।
नमो घोराय रौद्राय भीषणाय कपालिने॥ २८॥
नमस्ते सर्वभक्षाय बलीमुख नमोऽस्तुते।
सूर्यपुत्र नमस्तेऽस्तु भास्करेऽभयदाय च॥ २९॥
अधोदृष्टे नमस्तेऽस्तु संवर्तक नमोऽस्तुते।
नमो मन्दगते तुभ्यं निस्त्रिंशाय नमोऽस्तुते॥ ३०॥
तपसा दग्ध देहाय नित्यं योगरताय च।
नमो नित्यं क्षुधार्ताय अतृप्ताय च वै नमः॥ ३१॥
ज्ञानचक्षुर्नमस्तेऽस्तु काश्यपात्मजसूनवे।
तुष्टो ददासि वै राज्यं रुष्टो हरसि तत्क्षणात्॥ ३२॥
देवासुरमनुष्याश्च सिद्धविद्याधरोरगाः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तथा तव विलोकिताः सर्वे नाशं यान्ति समूलतः ॥ ३३ ॥
प्रसादं मे कुरु सौरे! वरदो भव भास्करे ॥ ३४ ॥

जिनके शरीर का वर्ण कृष्ण नील तथा भगवान शंकर के समान है, उन शनि देव को नमस्कार है। जो जगत के लिए कालाग्नि एवं कृतान्त रूप हैं, उन शनैश्चर को बार-बार नमस्कार है ॥ २५ ॥

जिनका शरीर कंकाल जैसा मांसहीन तथा जिनकी दाढ़ी-मूंछ और जटा बढ़ी हुई है, उन शनि देव को नमस्कार है। जिनके बड़े-बड़े नेत्र, पीठ में सटा हुआ पेट और भयानक आकार है उन शनैश्चर देव को नमस्कार है ॥ २६ ॥

जिनके शरीर का ढांचा फैला हुआ है, जिनके रोएं बहुत मोटे हैं, जो लम्बे-चौड़े किन्तु सूखे शरीर वाले हैं तथा जिनकी दाढ़ें काल रूप हैं, उन शनि देव को बार-बार प्रणाम है ॥ २७ ॥

शने! आपके नेत्र कोटर के समान गहरे हैं, आपकी ओर देखना कठिन है, आप घोर रौद्र, भीषण और विकराल हैं, आपको नमस्कार है ॥ २८ ॥

वलीमुख! आप सब कुछ भक्षण करने वाले हैं, आपको नमस्कार है। सूर्यनन्दन! भास्करपुत्र! अभय देने वाले देवता! आपको प्रणाम है ॥ २९ ॥

नीचे की ओर दृष्टि रखने वाले शनि देव! आपको नमस्कार है! संवर्तक! आपको प्रणाम है। मंद गति से चलने वाले शनैश्चर! आपका प्रतीक तलवार के समान है, आपको पुनः-पुनः प्रणाम है ॥ ३० ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आपने तपस्या से अपनी देह को दग्ध कर लिया है, आप सदा योगाभ्यास में तत्पर, भूख से आतुर और अतृप्त रहते हैं। आपको सदा सर्वदा नमस्कार है॥ ३१॥

ज्ञाननेत्र आपको प्रणाम है। काश्यपनन्दन सूर्यपुत्र शनिदेव आपको नमस्कार है। आप सन्तुष्ट होने पर राज्य दे देते हैं और रुष्ट होने पर उसे तत्क्षण हर लेते हैं॥ ३२॥

देवता, असुर, मनुष्य, सिद्ध, विद्याधर और नाग–ये सब आपकी दृष्टि पड़ने पर समूल नष्ट हो जाते हैं॥ ३३॥

देव मुझ पर प्रसन्न होइये। मैं वर पाने के योग्य हूँ और आपकी शरण में आया हूँ॥ ३४॥

एवं स्तुतस्तदा सौरिर्ग्रहराजो महाबलः।
अब्रवीच्च शनिर्वाक्यं हृष्टरोमा च पार्थिवः॥ ३५॥
तुष्टोऽहं तव राजेन्द्र! स्तोत्रेणाऽनेन सुव्रत।
एवं वरं प्रदास्यामि यत्ते मनसि वर्तते॥ ३६॥

राजा दशरथ के इस भांति प्रार्थना करने पर ग्रहों के राजा महाबलवान सूर्यपुत्र शनैश्चर बोले–उत्तम व्रत के पालक राजा दशरथ! तुम्हारी इस स्तुति में मैं अत्यन्त सन्तुष्ट हूँ। रघुनन्दन तुम इच्छानुसार वर मांगो, मैं अवश्य दूंगा॥ ३५–३६॥

दशरथ उवाच–

प्रसन्नो यदि मे सौरे! वरं देहि ममेप्सितम्।
अद्य प्रभृतिपिंगाक्ष! पीडा देया न कस्यचित्॥ ३७॥
प्रसादं कुरु मे सौरे! वरोऽयं मे महेप्सितः।

राजा दशरथ बोले–प्रभु आज से आप देवता, असुर, मनुष्य,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पशु, पक्षी तथा नाग–किसी भी प्राणी को पीड़ा न दें। बस यही मेरा प्रिय वर है॥ ३७॥

शनि उवाच–

अदेयस्तु वरोस्माकं तुष्टोऽहं च ददामि ते॥ ३८॥
त्वयाप्रोक्तं च मे स्तोत्रं ये पठिष्यन्ति मानवाः।
देवासुर-मनुष्याश्च सिद्ध विद्याधरोरगा॥ ३९॥
न तेषां बाधते पीड़ा मत्कृता वै कदाचन।
मृत्युस्थाने चतुर्थे वा जन्म-व्यय-द्वितीयगे॥ ४०॥
गोचरे जन्मकाले वा दशास्वन्तर्दशासु च।
यः पठेद्द्वि-त्रिसन्ध्यं वा शुचिर्भूत्वा समाहितः॥ ४१॥
न तस्य जायते पीडा कृता वै ममनिश्चितम्।

शनि ने कहा–हे राजन्! यद्यपि ऐसा वर मैं किसी को देता नहीं हूं परन्तु सन्तुष्ट होने के कारण तुमको दे रहा हूं। तुम्हारे द्वारा कहे गए इस स्तोत्र को जो मनुष्य, देव अथवा असुर, सिद्ध तथा विद्वान आदि पढ़ेंगे, उन्हें शनि बाधा नहीं होगी। जिनके गोचर में महादशा या अन्तर्दशा में अथवा लग्न स्थान, द्वितीय, चतुर्थ, अष्टम अथवा द्वादश स्थान में शनि हो वे व्यक्ति यदि पवित्र होकर प्रातः, मध्याह्न और सायंकाल के समय इस स्तोत्र को ध्यान देकर पढ़ेंगे उनको निश्चित रूप से मैं पीड़ित नहीं करूँगा॥ ३८–४१॥

प्रतिमां लोहजां कृत्वा मम राजन् चतुर्भुजाम्॥ ४२॥
वरदां च धनुःशूल-बाणाङ्कितकरां शुभाम्।
अयुतमेकजप्यं च तद्दशांशेन होमतः॥ ४३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृष्णैस्तिलैः शमीपत्रैर्घृताक्तैर्नीलपङ्कजैः।
पायसंशर्करायुक्तं घृतमिश्रं च होमयेत्॥ ४४॥
ब्राह्मणान्भोजयेत्तत्र स्वशक्त्या घृत-पायसैः।
तैलं वा तेलराशौ वा प्रत्यक्षं वै यथाविधिः॥ ४५॥

हे राजन्! जिनको मेरी कृपा प्राप्त करनी है उन्हें चाहिए कि वे मेरी लोहे की मूर्ति बनाएं, जिनकी चार भुजाएं हों और उनमें धनुष, भाला और बाण धारण किए हुए हों। * इसके पश्चात् दस हजार की संख्या में इस स्तोत्र का जप करें, जप का दशांश हवन करें जिसको सामग्री काले तिल, शमीपत्र, घी, नील कमल, खीर, चीनी मिलाकर बनाई जाए। इसके पश्चात् घी तथा दूध से निर्मित पदार्थों से ब्राह्मणों को भोजन कराएं। उपरोक्त शनि की प्रतिमा को तिल के तेल या तिलों के ढेर में रखकर विधि-विधानपूर्वक॥ ४२-४५॥

पूजनं चैव मन्त्रेण कुङ्कुमाद्यं च लेपयेत्।
नील्या वा कृष्णतुलसी शमीपत्रादिभिः शुभैः॥ ४६॥
दद्यान्मे प्रीतये यस्तु कृष्णवस्त्रादिकं शुभम्।
धेनुं वा वृषभं चापि सवत्सां च पयस्विनीम्॥ ४७॥
एवं विशेषपूजां च मद्वारे कुरुते नृप!
मन्त्रोद्धारविशेषेण स्तोत्रेणानेन पूजयेत्॥ ४८॥
पूजयित्वा जपेत्स्तोत्रं भूत्वा चैव कृताञ्जलिः।

---

*- टीन के डिब्बे अथवा कनस्तर को कैंची या कतिया से काटकर ऐसी प्रतिमा घर पर ही बनाई जा सकती है। इसके ऊपर काला पेन्ट या तेल में काजल मिलाकर काला रंग कर देना चाहिए।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तस्य पीडां न चैवाहं करिष्यामि कदाचन॥ ४९॥
रक्षामि सततं तस्य पीडां चान्यग्रहस्य च।
अनेनैव प्रकारेण पीडामुक्तं जगद्भवेत्॥ ५०॥

मन्त्र द्वारा पूजन करें, कुंकुम इत्यादि चढ़ाएं, नीली तथा काली तुलसी, शमी के पत्ते मुझे प्रसन्न करने के लिए अर्पित करें। काले रंग के वस्त्र, बैल, दूध देने वाली गाय बछड़े सहित दान में दें। हे राजन्! जो मन्त्रोद्धारपूर्वक इस स्तोत्र से मेरी पूजा करता है, पूजा करके हाथ जोड़कर इस स्तोत्र का पाठ करता है उसको मैं किसी प्रकार की पीड़ा नहीं होने दूंगा। इतना ही नहीं बल्कि अन्य ग्रहों की पीड़ा से भी मैं उसकी रक्षा करता हूँ। इस तरह अनेकों प्रकार से मैं जगत को पीड़ा से मुक्त करता हूँ॥ ४६-५०॥

वरद्वयं तु सम्प्राप्य राजा दशरथस्तदा।
मत्वा कृतार्थमात्मानं नमस्कृत्य शनैश्चरं॥ ५१॥
शनैश्चराभ्यनुज्ञातो रथमारुह्य वीर्यवान्।
स्वस्थानं च गतो राजा प्राप्तकामोऽभवत्तदा॥ ५२॥
सर्वासिद्धिमवाप्याथ विजयी सर्वदाऽभवत्।
कोणस्थः पिङ्गलोबभ्रुः कृष्णो रौद्रान्तको यमः॥ ५३॥
सौरिः शनैश्चरो मन्दः पिप्लाश्रय संस्थितः।
एतानि शनिनामनि जपेद्शबत्थे सन्निधौ॥ ५४॥
शनैश्चरकृता पीडा न कदाचित् भविष्यति।

इस प्रकार शनि से दो वर प्राप्त करके अपने को धन्य समझते हुए राजा दशरथ शनि को प्रणाम करके उनसे अनुमति लेकर रथ पर चढ़कर अपने राज्य में लौट आए और उनके

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सकल मनोरथ पूर्ण होते रहे। उन्हें सब प्रकार की सिद्धियां प्राप्त हुई और सदा विजयश्री ने उनका वरण किया। जो व्यक्ति शनि देवता के इन दस नामों-(१) कोणस्थ, (२) पिंगल, (३) बभ्रु, (४) कृष्ण, (५) रौद्रान्तक, (६) यम, (७) सौरि, (८) शनैश्चर, (९) मन्द और (१०) पिप्पलाश्रय संस्थित को पीपल वृक्ष के नीचे बैठकर जपेगा उसको शनि की पीड़ा कभी नहीं होगी॥ ५१-५४॥

अल्पमृत्यु विनाशाय दुःखस्योद्धारणाय च॥ ५५॥
स्नातव्यं तिलतैलेन धान्य-माषादिकं तथा।
लौहं देयं च विप्राय सुवर्णेन समन्तितम्॥ ५६॥
शनिस्तोत्रं पठेद्यस्तु श्रृणुयाद्वा समाहितः।
विजयं चार्थ कामौ च सुखमारोग्यमाप्नुयात्॥ ५७॥

अकाल मृत्यु का नाश करने और कष्टों से उद्धार पाने के लिए तिल के तैल से स्नान करें। धान्य, उड़द, लोहा तथा स्वर्ण आदि का दान करें। इस शनि स्तोत्र का स्वयं पाठ करें अथवा ब्राह्मण द्वारा सुनें तो ऐसा करने से सर्वत्र अर्थ, काम, सुख और आरोग्य की प्राप्ति होती रहती है॥ ५५-५७॥

॥ इति श्री दशरथकृत शनिस्तोत्रम् सम्पूर्णम॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्री गणेशाय नमः

शनैश्चरस्तवराजः

॥ नारद उवाच ॥

ध्यात्वा गणपतिं राजा धर्मराजो युधिष्ठिरः।
धीरः शनैश्चरस्येमं चकार स्तवमुत्तमम्॥ १॥
शिरो में भास्करिः पातु भालं छायासुतोऽवतु।
कोटराक्षो दृशौ पातु शिखिकण्ठनिभः श्रुती॥ २॥
घ्राणं मे भीषणः पातु मुखं बलिमुखोऽवतु।
स्कन्धौ संवर्तकः पातु भुजौ मे भयदोऽवतु॥ ३॥
सौरिर्मे हृदयं पातु नाभिं शनैश्चरोऽवतु।
ग्रहराजः कटिं पातु सर्वतो रविनन्दनः॥ ४॥
पादौ मन्दगतिः पातु कृष्णः पात्वखिलं वपुः।
रक्षामेतां पठेन्नित्यं सौरेर्नामबलैर्युताम्॥ ५॥
सुखी पुत्री चिरायुश्च स भवेन्नात्र संशयः।
ॐ सौरिः शनैश्चरः कृष्णो नीलोत्पलनिभः शनिः॥ ६॥
शुष्कोदरो विशालाक्षो दुर्निरीक्ष्यो विभीषणः।
शितिकण्ठनिभो नीलश्छायाहृदयनन्दनः॥ ७॥
कालदृष्टिः कोटराक्षः स्थलरोमा बलीमुखः।
दीर्घो निर्मांसगात्रस्तु शुष्को गोरो भयानकः॥ ८॥
नीलांशुः क्रोधनो रौद्रो दीर्घश्मश्रुर्जटाधरः।
मन्दो मन्दगतिः खञ्जोऽतृप्तः संवर्तको यमः॥ ९॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्रहराजः कराली च सूर्यपुत्रो रविः शशी।
कुजो बुधो गुरुः काव्यो भानुजः सिंहिकासुतः॥ १०॥
केतुर्देवपतिर्बाहुः कृतान्तो नैर्ऋतस्तथा।
शशी मरुत्कुबेरश्च ईशानः सुर आत्मभूः॥ ११॥
विष्णुर्हरो गणपतिः कुमारः काम ईश्वरः।
कर्ता हर्ता पालयिता राज्यभुग् राज्यदायकः॥ १२॥
छायासुतः श्यामलांगो धनहर्ता धनप्रदः।
क्रूरकर्मविधाता च सर्वकर्मावरोधकः॥ १३॥
तुष्टो रुष्टः कामरूप कामदो रविनन्दनः।
ग्रहपीडाहरः शान्तो नक्षत्रेशोग्रहेश्वरः॥ १४॥
स्थिरासनः स्थिरगतिर्महाकायो महाबलः।
महाप्रभो महाकाल, कालात्मा कालकालकः॥ १५॥
आदित्यभयदाता च मृत्युरादित्यनन्दन।
शतभिरुक्षदयितः त्रयोदशतिथिप्रियः॥ १६॥
तिथ्यात्मा तिथिगणो नक्षत्रगणनायकः।
योगराशिर्मुहूर्तात्मा कर्ता दिनपतिः प्रभुः॥ १७॥
शमीपुष्पप्रियः श्यामस्त्रैलोक्याभावदायकः।
नीलवासाः क्रियासिन्धुर्नीलाञ्जनचयच्छविः॥ १८॥
सर्वरोगहरो देवः सिद्धो देवगणस्तुतः।
अष्टोत्तरशतं नाम्नां सौरेश्छायासुतस्य यः॥ १९॥
पठेन्नित्यं तस्य पीड़ा समस्ता नश्यति ध्रुवम्।
कृत्वा पूजां पठेन्मर्त्यो भक्तिमान् यः स्तवं सदा॥ २०॥
विशेषतः शनिदिने पीड़ा तस्य विनश्यति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जन्मलग्ने स्थितिर्वापि गोचरे क्रूरराशिगे॥ २१॥
दशासु च गते सौरेस्तदा स्तवमिमं पठेत्।
पूजयेद्यः शनिं भक्त्या शमीपुष्पाक्षताम्बरैः॥ २२॥
विधाय लोहप्रतिमां नरो दुःखाद्विमुच्यते।
बाधा त्वन्यग्रहाणां च यः पठेत्तस्य नश्यति॥ २३॥
भीतो भयाद्विमुच्येत बद्धो मुच्येत बन्धनात्।
रोगी रोगाद्विमुच्येत नरः स्तवमिमं पठेत्॥ २४॥
पुत्रवान्धनवान् श्रीमाञ्जायते नात्र संशयः॥ २५॥

नारद उवाच

स्तवं निशम्य पार्थस्य प्रत्यक्षोऽभूच्छनैश्चरः।
दत्त्वा राज्ञे वरं कामं शनिश्चान्तर्दधे तदा॥ २६॥

॥ इति श्री भविष्य पुराणे शनैश्चरस्तवराज समाप्तः॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शनि स्तोत्रम्

श्री गणेशाय नमः

अस्य श्रीशनैश्चरस्तोत्रस्य दशरथ ऋषिः।
श्री शनैश्चरो देवता ॥ त्रिष्टुप् छन्द॥
शनैश्चरप्रीत्यर्थं जपे विनियोगः॥

दशरथ उवाच

कोणोऽन्तको रौद्रयमोऽथ बभ्रुः कृष्णः शनिः पिंगलमन्दसौरिः।
नित्यं स्मृतो यो हरते च पीडां तस्मै नमः श्रीरविनन्दनाय॥ १॥

सुरासुराः किंपुरुषोरगेन्द्रा गन्धर्वविद्याधरपन्नगाश्च।
पीड्यन्ति सर्वे विषमस्थितेन तस्मै नमः श्रीरविनन्दनाय॥ २॥

नरा नरेन्द्रा पशवो मृगेन्द्रा वन्याश्च ये कीटपतङ्गभृङ्गाः।
पीड्यन्ति सर्वे विषमस्थितेन तस्मै नमः श्रीरविनन्दनाय॥ ३॥

देशाश्च दुर्गाणि वनानि यत्र सेनानिवेशाः पुरपत्तनानि।
पीड्यन्ति सर्वे विषमस्थितेन तस्मै नमः श्रीरविनन्दनाय॥ ४॥

तिलैर्यवैर्माषगुडान्नदानैर्लोहेन नीलाम्बरदानतो वा।
प्रीणाति मन्त्रैर्निजवासरे च तस्मै नमः श्रीरविनन्दनाय॥ ५॥

प्रयागकूले यमुनातटे च सरस्वतीपुण्यजले गुहायाम्।
यो योगिनां ध्यानगतोऽपि सूक्ष्मस्तस्मै नमः श्रीरविनन्दनाय॥ ६॥

अन्यप्रदेशात्स्वगृहं प्रविष्टस्तदीयवारे स नरः सुखी स्यात्।
गृहाद्गतो यो न पुनः प्रयाति तस्मै नमः श्रीरविनन्दनाय॥ ७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्रष्टा स्वयंभूर्भुवनत्रयस्य त्राता हरीशो हरते पिनाकी।
एकस्त्रिधा ऋग्यजुः साममूर्तिस्तस्मै नमः श्रीरविनन्दनाय॥ ८॥

शन्यष्टकं यः प्रयतः प्रयाते नित्यं सुपुत्रैः पशुबान्धवैश्च।
पठेत्तु सौख्यं भुवि भोगयुक्तः प्राप्नोति निर्वाणपदं तदन्ते॥ ९॥

कोणस्थः पिंगलो बभ्रुः कृष्णो रौद्रोऽन्तको यमः।
सौरिः शनैश्चरो मन्दः पिप्पलादेन संस्तुतः॥ १०॥

एतानि दश नामानि प्रातरुत्थाय यः पठेत्।
शनैश्चरकृता पीड़ा न कदाचिद्भविष्यति॥ ११॥

॥ इति श्री शनैश्चरस्तोत्रं सम्पूर्णम्॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शनि वज्र पंजर कवच

अथ विनियोगः–

अस्य श्रीशनैश्चरकवचस्तोत्रमन्त्रस्य कश्यप ऋषिः।
अनुष्टुप् छन्द। शनैश्चरो देवता। शीं शक्तिः।
शूं कीलकम्। शनैश्चरप्रीत्यर्थं जपे विनियोगः॥

विनियोग पढ़कर पंचपात्र में से अथवा दाहिनी अंजुलि में लिया हुआ जल भूमि पर छोड़ दें। इसके पश्चात् कवच पाठ करें।

नीलाम्बरो नीलवपुः किरीटी,
गृध्रस्थितस्त्रासकरो धनुष्मान्।
चतुर्भुजः सूर्यजः प्रसन्नः,
सदा मम स्याद्वरदः प्रशान्तः॥ १॥

ब्रह्मोवाच–

श्रृणुध्वमृषयः सर्वे शनिपीडाहरं महत्।
कवचं शनिराजस्य सौरेरिदमनुत्तमम्॥ २॥

कवचं देवतावासं वज्रपंजरसंज्ञकम्।
शनैश्चरप्रीतिकरं सर्वसौभाग्यदायकम्॥ ३॥

ॐ श्रीशनैश्चरः पातु भालं मे सूर्यनंदनः।
नेत्रे छायात्मजः पातु पातु कर्णौ यमानुजः॥ ४॥

नासां वैवस्वतः पातु मुखं मे भास्करः सदा।
स्निग्धकंठश्च मे कंठं भुजौ पातु महाभुजः॥ ५॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्कंधौ पातु शनिश्चैव करौ पातु शुभप्रदः।
वक्षः पातु यमभ्राता कुक्षिं पात्वसितस्तथा॥ ६॥

नाभिं ग्रहपतिः पातु मंदः पातु कटिं तथा।
उरू ममांतकः पातु यमो जानुयुगं तथा॥ ७॥

पादौ मंदगतिः पातु सर्वांगं पातु पिप्पलः।
अङ्गोपाङ्गानि सर्वाणि रक्षेन्मे सूर्यनंदनः॥ ८॥

इत्येतत्कवचं दिव्यं पठेत्सूर्यसुतस्य यः।
न तस्य जायते पीडा प्रीतो भवति सूर्यजः॥ ९॥

व्ययजन्मद्वितीयस्थो मृत्युस्थानगतोऽपि वा।
कलत्रस्थो गतो वापि सुप्रीतस्तु सदा शनिः॥ १०॥

अष्टमस्थे सूर्यसुते व्यये जन्मद्वितीयगे।
कवचं पठते नित्यं न पीडा जायते क्वचित्॥ ११॥

इत्येतत्कवचं दिव्यं सौरेर्यन्निर्मितं पुरा।
द्वादशाष्टमजन्मस्थदोषान्नाशयते सदा।
जन्मलग्नस्थितान्दोषान् सर्वान्नाशयते प्रभुः॥ १२॥

॥ इति श्रीब्रह्माण्डपुराणे ब्रह्मनारदसंवादे
शनि वज्रपंजर कवचं सम्पूर्णम्॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हमारे प्रमुख प्रकाशन

★ श्रीमद् भागवत महापुराण (बड़ा आकार)
★ सम्पूर्ण श्री शिव महापुराण (बड़ा आकार)
★ सम्पूर्ण महाभारत (८ चित्रों सहित)
★ सम्पूर्ण रामायण (चित्रों सहित, हिन्दी में)
★ श्री हनुमान जीवन चरित्र (१६ चित्रों सहित)
★ श्री दुर्गा सप्तशती (नव दुर्गा पाठ)
★ श्रीमद् भगवद्गीता (दोरंगी छपाई)
★ योग वशिष्ठ : महारामायण (नंदलाल दशोरा)
★ ब्रह्मसूत्र : वेदान्त दर्शन (नंदलाल दशोरा)
★ योग साधना और उसके लाभ (नंदलाल दशोरा)
★ मृत्यु और परलोक यात्रा (नंदलाल दशोरा)
★ अष्टावक्र गीता
★ मनुस्मृति (हिन्दी अनुवाद सहित)
★ महापुरुषों के अनमोल वचन
★ ईश्वर की प्राप्ति और ज्ञानवर्धक कथाएं
★ भगवान के पांच विचित्र अवतारों की कथा
★ चाणक्य नीति और जीवन चरित्र (सचित्र)
★ भारतीय व्रत पर्व और त्यौहार (सचित्र)
★ आओ सीखें मेंहदी (१०१ डिजाइन)
★ महिला संगीत (लोकगीत)
★ मंत्र तंत्र द्वारा रोग निवारण (तांत्रिक बहल)
★ तंत्र द्वारा यश, धन और विद्या प्राप्ति (पं. हरिओम कौशिक)
★ तंत्र द्वारा मनोकामना सिद्धि (भृगुनाथ मिश्र)
★ सुखी जीवन के लिए टोटके और मंत्र (तांत्रिक बहल)
★ मंत्र रामायण- रामचरितमानस के सिद्ध मंत्र (यशपालजी)
★ तंत्र प्रयोग : सुलभ सामग्री से सफल प्रयोग (यशपालजी)
★ रुद्राक्ष महात्म और धारण विधि (बाबा औढरनाथ)

1. ऋग्वेद सार
2. सामवेद सार
3. यजुर्वेद सार
4. अथर्ववेद सार

सम्पूर्ण प्रकाशनों का मूल्य सूची मांग पर

रणधीर प्रकाशन फोन 426297
रेलवे रोड, आरती होटल के पीछे, हरिद्वार-249401

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection